**चक्षु** *m.* or *n.* Ved. The eye.

**चक्षुस्** *a.* [ चक्ष् करणे उसि Uṇ. 2. 118 ] Seeing. *-n.* 1 The eye; दृश्यं तमसि न पश्यति दीपेन विना सचक्षुरपि M. 1. 9; कृष्णसारे ददच्चक्षुः Ś. 1. 6; cf. words like घ्राणचक्षुस्, ज्ञानचक्षुस्, नयचक्षुस्, चारचक्षुस् &c. -2 Sight, look, vision, the faculty of sight; चक्षुरायुश्चैव प्रहीयते Ms. 4. 41, 42. -3 Light, clearness. -4 Lustre, splendour. **-Comp. -गोचर** *a.* visible, being within the range of the eye. **-ग्रहणम्** morbid affection of the eye. **-दानम्** the ceremony of anointing the eyes of an image at the time of consecrating it. **-पथः** the range of sight, the horizon. **-बन्धः** blinding the sight; Vās. 67. **-मलम्** the excretion of the eyes. **-रागः** ( चक्षूरागः ) 1 redness in the eyes. -2 'eye-love', love or liking as expressed by an exchange of glances; पुरश्चक्षूरागस्तदनु मनसोऽनन्यपरता Māl. 6. 15; चक्षूरागः कोकिलेषु न परकलत्रेषु K. 41 (where the word has sense 1 also). **-रोगः** ( चक्षूरोग ) a disease of the eye. **-विषयः** 1 the range of sight, ken, presence, visibility; चक्षुर्विषयातिक्रान्तेषु कपोतेषु H. 1; Ms. 2. 198. -2 an object of sight, any visible object. -3 the horizon. **-श्रवस्** *m.* a serpent; तमाशु चक्षुःश्रवसां समूहं मन्त्रेण तार्क्ष्योदयकारणेन **-श्रुति** *m.* ( = **-श्रवस्** ) गोभिः कण्ठतटस्य ह्रुष्यति पुरो दृक्पस्य चक्षुःश्रुतेः Rāj. T. 5. 1; Ki. 16. 42; इति स्म चक्षुःश्रवसां प्रियानले स्तुवन्ति निन्दन्ति हृदा तदात्मनः N. 1. 28. **-हन्** *a.* who kills the enemy by the mere glance; सेवे चक्षुर्हणः पार्थानुग्रवीर्यप्रतापिनः Mb. 3. 233. 22.

**चक्षुष्मत्** *a.* 1 Seeing, furnished with eyes, endowed with the faculty of sight; तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः R. 4. 18; °ता 4. 13. -2 Having a clear sight or good eyes. -3 Possessed of foresight; Kau. A. 1. 9.

**चक्षुष्य** *a.* [ चक्षुषे हितः यत् ] 1 Good looking, agreeable to the sight, pleasing, beautiful; Śi. 8. 57. -2 Good for the eyes. -3 Produced from the eye; देवतानां पितॄणां च चक्षुष्यं चात्मनां विभो Mb. 13. 68. 28. **-ष्यः, -ष्या** A collyrium or application to the eyes. **-ष्या** A pleasing or agreeable woman. **-ष्यम्** An ointment for the eyes (Mar. सुरमा ?); तार्क्ष्यशैलं शिखिग्रीवं चक्षुष्यं यामुनं पुनः Śiva. B. 30. 18.

**चङ्कुणः, -रः** 1 A tree. -2 A carriage. -3 A vehicle in general (*n.* also).

**चङ्क्रमणम्** *a.* [ क्रम् यङ् ल्युट् यङो लुक् Tv. ] 1 Moving about, taking exercise. -2 Going slowly or crookedly. -3 Moving or going about, walking; विष चङ्क्रमणं रात्रौ Chāṇ. 97; चक्रे स चक्रेनिभचङ्क्रमणच्छलेन N. 1. 144; स्वजन्मना चङ्क्रमणेन चाञ्चति Bhāg. 1. 10. 26. -4 Going slowly or tortuously. -5 Leap, jump, spring; Pt. 4.

**चङ्क्रमा** Going or moving about, walking.

**चङ्ग** *a.* 1 Handsome, beautiful. -2 Clever. -3 Healthy, sound.

**चङ्गिमन्** *m.* Beauty.

**चञ्च्** 1 P. ( चञ्चति, चञ्चित ) 1 To move, wave, shake; समराशिरसि चञ्चत्पञ्चचूडश्चमूनाम् U. 5. 3; Māl. 5. 23; चञ्चच्चञ्चू Nāg. 4; चञ्चत्पराग Gīt. 1. -2 To dangle about; विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम् Gīt. 4. -3 To leap, jump. -4 To go, move.

**चञ्चः** [ चञ्च्-अच् ] 1 A basket. -2 A measure of length equal to 5 fingers पञ्चाङ्गुलं मानम् ). **-ञ्चा** 1 Anything made of cane (as mat &c.). -2 A straw-man, doll. -3 puppet of grass or reed. -4 A contemptuous epithet of man; चञ्चापुरुषः Śārṅg. P. 23.

**चञ्चत्क** *a.* 1 Leaping, jumping. -2 Moving, trembling, shaking.

**चञ्चरिन्** *m.* The large black bee; करी बरीभरीति चेद् दिशं सरीसरीति काम् । स्थिरी चरीकरीति चेन्न चञ्चरीति चञ्चरी Udb.

**चञ्चरी, -चञ्चरीकः** A large black bee; चुलुकयति मदीयां चेतनां चञ्चरीकः R. G.; कुन्दलताया विमुक्तमकरन्दरसाया अपि चञ्चरीकः । प्रणयप्ररूढप्रेमभरभञ्जनकातरभावभीतः ॥ Vb. 1. 4; Vikr. 1. 2; Bv. 1. 48.

**चञ्चल** *a.* [ चञ्च-अलच, चञ्चं गतिं लाति ल-क वा Tv. ] 1 Moving, shaking, trembling, tremulous; श्रुत्वैव भीतहरिणीशिशुचञ्चलाक्षीम् Ch. P. 27; चञ्चलकुण्डल Gīt. 7; Amaru. 79. -2 (Fig.) Inconstant, fickle, unsteady; भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चलाः Bh. 3. 54; Ki. 2. 19; मनश्चञ्चलमस्थिरम् Bg. 6. 26. **-लः** 1 The wind. -2 A lover -3 A libertine. **-ला** 1 Lightning. -2 Lakṣmī, the goddess of wealth.

**चञ्चु** *a.* [ चञ्च्-उन् ] 1 Celebrated, renowned, known. -2 Clever (as अक्षरचञ्चु); ओष्ठेन रामो रामोष्ठबिम्बचुम्बनचञ्चुता Śi. 2. 14; see चुञ्चु. **-ञ्चुः** 1 A deer. -2 N. of a caster-oil plant (Mar. रक्त एरंड). **-ञ्चुः, -ञ्चूः** *f.* A beak, bill. **-Comp. -पुटः, -टम्** the bill of a bird when shut; चञ्चूपुटं चपलयन्ति चकोरपोताः R. G.; Bv. 2. 99; अमोचि चञ्चूपुटमौनमुद्रा विहायसा तेन विहस्य भूयः N. 3. 99; तुतुदे ननु कण्डुपण्डितः पटुचञ्चूपुटकोटिकुट्टनैः N. 2. 4; व्यलिखच्चञ्चुपुटेन पक्षती 2. 2; Amaru. 13. **-प्रहारः** a peck with the beak. **-भृत्, -मत्**, *m.* a bird. **-सूचिः** the tailor bird.

**चञ्चुका** A beak, bill.

**चञ्चुर** *a.* Clever, expert.

**चञ्चूर्यमाण** *a.* Gesticulating indecently; प्राप्य चञ्चूर्यमाणासौ पतीयन्ती रघूत्तमम् Bk. 4. 19.

**चट्** I. 1. P. ( चटति, चटित ) 1 To break, fall off, separate. -2 To rain. -3 To cover. -II 10 U. ( चाटयति -ते ) 1 To kill, iujure. -2 To pierce, break.

**चटकः** A sparrow.

**चटका, चटिका** 1 A hen-sparrow. -2 The root of long pepper. **-Comp. -मुखः** A particular type of arrow; क्षुरप्रैश्चटकामुखैः Mb. 8. 49. 36. **-शिरस्** n. The root of long pepper.